श्री दंडपाणि पंचरत्नं

श्री दंडपाणि पंचरत्नं

चंडपापहरपादसेवनं
गंडशोभिवरकुंडलद्वयं |
दंडिताखिलसुरारिमंडलं
दंडपाणिमनिशं विभावये || 1 ||

कालकालतनुजं कृपालयं
बालचंद्रविलसज्जटाधरं |
चेलधूतशिशुवासरेश्वरं
दंडपाणिमनिशं विभावये || 2 ||

तारकेशसदृशाननोज्ज्वलं
तारकारिमखिलार्थदं जवात् |
तारकं निरवधेर्भवांबुधे-
-र्दंडपाणिमनिशं विभावये || 3 ||

तापहारिनिजपादसंस्तुतिं
कोपकाममुखवैरिवारकं |
प्रापकं निजपदस्य सत्वरं
दंडपाणिमनिशं विभावये || 4 ||

कामनीयकविनिर्जितांगजं
रामलक्ष्मणकरांबुजार्चितं |
कोमलांगमतिसुंदराकृतिं
दंडपाणिमनिशं विभावये || 5 ||

इति शृंगेरिजगद्गुरु श्रीसच्चिदानंदशिवाभिनवनृसिंहभारती स्वामिभिः विरचितं श्रीदंडपाणि पंचरत्नं |